International Journal of Sanskrit Research 2019; 5(5): 132-136

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(5): 132-136
© 2019 IJSR
www.anantaajournal.com
Received: 14-07-2019
Accepted: 19-08-2019

**Gouranga Show**
Guest Lecturer
Department of Sanskrit,
Netaji Satabarshiki
Mahavidyalay, Ashoknagar,
West Bengal, India

**Correspondence**
**Gouranga Show**
Guest Lecturer
Department of Sanskrit,
Netaji Satabarshiki
Mahavidyalay, Ashoknagar,
West Bengal, India

# साहित्यदृष्ट्या शिक्षकचरितसमीक्षा

## Gouranga Show

**Abstract**
शिक्षकशब्देन यः शिक्षां ददाति स एव बोध्यः। इह जगति सन्ति बहवः शिक्षकाः, परं ते सर्व आदर्शशिक्षका इति वक्तुं न शक्यते। आदर्शशिक्षको हि स एव उच्यते यः शिक्षादानार्थम् आत्मानम् उत्सृजति। शिक्षा हि तस्य ध्यानम्। शिक्षाविस्तारं विना नास्ति तस्य कोऽपि चिन्ताविषयः। यमवलम्ब्य वयमस्माकं जीवनगतेः परिचालनं कुर्मः, स इव भवितुं वयं सर्वदा मनसि चेष्टां कुर्मः, स एव अस्माकम् आदर्शः। प्रतिमूर्तिः यथा मूर्तेः अनुरूपा भवति तथैव वयमादर्शस्य अनुरूपा भवामः। प्रतिमूर्त्या सह मूर्तेः यः सम्बन्धः, अस्माकं जीवने आदर्शेन सह स एव सम्बन्धः। वयं यत् किमपि कुर्मः तत्तु अस्माकमादर्शस्य अनुसरणस्य फलम्। एतत् कार्यं वयं सर्वे एव कुर्मः। आदर्शस्य अनुसरणं न करोति एवं मनुष्यो दुर्लभः। छात्रा आदर्शशिक्षकस्य चरित्रमवलम्ब्य स्वजीवननिर्माणं कुर्वन्ति। अतः छात्राणां जीवननिर्माणे आदर्शशिक्षकस्य अस्ति महती भूमिका। आदर्शशिक्षकस्य चरितस्य बहूनि वैशिष्ट्यानि साहित्ये बहुत्रैव प्रदर्शितानि।

**Key Words:** शिक्षकः, गुरुः, आचार्यः, साहित्यमिति

### प्रस्तावना
सहितशब्दात् परं ष्यञ्-प्रत्ययेन क्लीबलिङ्गे साहित्यमिति रूपम्। हितेन रसेन वा विगलितवेद्यान्तज्ञानबलेन सह युक्तं सहितम्, तस्य भावः साहित्यमिति। अथवा हितं विहितमावृतं वा हितं सन्निहितं कविभी रक्षितं वा ब्रह्मणा अवहितं ध्यातं वा तेन सह सहितम्, तस्य भावः साहित्यमिति साहित्यपदविवेचनधुरन्धराः। समाजस्य दर्पणः खलु साहित्यम्। सामाजिकभावनानां सामाजिकविचाराणां च अभिव्यक्तेः हेतोः यदि साहित्यं समाजस्य दर्पणोऽस्ति तदा सांस्कृतिकाचाराणां विपुलप्रचारेण साहित्यं संस्कृत्या वाहनं खलु। साहित्येषु आदर्शचरितानि कमनीयकथावस्तूनि च तथा वर्ण्यन्ते यथा तानि पाठं पाठं श्रावं श्रावं दर्शं दर्शं च चित्तं चमत्कृतमानन्दितं च जायते। एवं साहित्ये आदर्शशिक्षकस्य आदर्शाचार्यस्य आदर्शगुरोर्वा चरित्रस्य चित्रं बहुत्रैव दृश्यते।

### महाभारतदृष्ट्या
भारतीयसाहित्यस्य गौरवं खलु महाभारतम्। महाशब्देन अस्य महत्त्वम्, भारतशब्देन चास्य भारतीयेतिहासधर्मदर्शनसंस्कृतिनिधानत्वं सूचितं भवति। अस्यार्थः, संस्कृतवाङ्मयस्य सारभूतमिदं महाभारतम्। सर्वजनप्रियत्वाय निखिलमपि वैदिकं लौकिकं च तथ्यम्, शास्त्रसारम्, आख्यानम्, नीतिशास्त्रम्, आचारशास्त्रम्, अन्यच्चापि सर्वजनोपयोगितत्त्वमत्र सङ्गृह्य प्रस्तूयते। धर्मार्थकाममोक्षाणां पुरुषार्थानां विशदविवरणात्मकं परमरमणीयमादरणीयञ्च महाकाव्यमिदं वर्तते। अत एव उच्यते वैशम्पायनेन –

> धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
> यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।।[1] इति।

महाभारतस्य चरित्राणि स्वकीयवैशिष्ट्येन प्रस्फुटितानि। अत्र महाभारते शिक्षकस्य आचार्यस्य वा कानि कानि वैशिष्ट्यानि भविष्यन्ति तानि वैशिष्ट्यानि सम्यग्रूपेण प्रस्फुटितानि। एकः शिक्षको बुद्धिमान्, उदारचेताः, अस्त्रशास्त्रेऽभिज्ञः, देवता इव बलवान् भवेत्। उक्तं यथा महाभारते –

> नाल्पधीर्नामहाभागस्तथा नानास्त्रकोविदः।
> नादेवसत्त्वो विनयेत् कुरूनस्त्रे महाबलान्।।[2] इति।

---

१महाभारते, आदिपर्वणि, ६२.५३
२ महाभारते, आदिपर्वणि, २६०.२

महाभारते भीष्मेण उक्तं पितुः मातुः च अपि गुरुः श्रेष्ठः, यतः पितरौ तु देहस्य जन्मदानं कुरुतः, किन्तु धर्मपरायणो गुरुः उपनयनेन वेदपाठदानेन यज्जन्मदानं करोति तत्तु अलौकिकमजरममरञ्च। महाभारते उच्यते यथा –

गुरुर्गरीयान् पितृतो मातृतश्चेति मे मतिः।
उभौ हि मातापितरौ जन्मन्येवोपयुज्यतः।
आचार्यशिष्टा या जातिः सा विद्या साजरामरा।। [3] इति।

येन कार्येण शिष्य उपाध्यायस्य प्रसादं करोति, तेन कार्येण परब्रह्मणः परमात्मनः पूजा भवति। अतो मातुः पितुश्च गुरुरधिकपूजनीयः। यथोच्यते महाभारते –

येन प्रीणात्युपाध्यायं तेन स्याद् ब्रह्म पूजितम्।
मातृतः पितृतश्चैव तस्मात् पूज्यतमो गुरुः।।[4] इति।

अत्र महाकाव्ये व्यासद्रोणपरशुरामादीनां माहात्म्यं तु विदितचरमेव।

**द्रोणाचार्यः**

द्रोण एक आदर्श आचार्य आसीत्। स वेदे वेदाङ्गशास्त्रे निपुण आसीत्। अग्नेः पुत्रः अग्निवेश्यमुनिः भरद्वाजस्य पुत्राय द्रोणाय आग्नेयमहास्त्रशिक्षामयच्छत्। यथोच्यते –

ततः समभवद् द्रोणः कलशे तस्य धीमतः।
अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्वशः।।[5] इति।
अग्नेस्तु जातः स मुनिस्ततो भरतसत्तम।
भारद्वाजं तदाग्नेयं महास्त्रं प्रत्यपादयत्।।[6] इति।

आचार्यो द्रोणः सर्वशास्त्रे निपुण आसीत्। तस्य पाण्डित्यं दृष्ट्वा महात्मा भीष्मः पाण्डवान् कौरवान् च शिष्यरूपेण द्रोणाय समर्पितवान्। उच्यते महाभारते –

इति सञ्चिन्त्य गाङ्गेयस्तदा भरतसत्तम।
द्रोणाय वेदविदुषे भारद्वाजाय च धीमते।।
पाण्डवान् कौरवांश्चैव ददौ शिष्यान्नरर्षभ।
शास्त्रतः पूजितश्चैव सम्यक् तेन महात्मना।।
स भीष्मेण महाभागस्तुष्टोऽस्त्रविदुषां वरः।
प्रतिजग्राह तान् सर्वान् शिष्यत्वेन महायशाः।।[7] इति।

वस्तुतस्तु आचार्यो द्रोणो न केवलम् आदर्श आचार्य आसीत्, स एक आदर्शः छात्रः अपि आसीत्। आचार्यः परशुरामो धनुर्वेदज्ञः, अलौकिकशास्त्रज्ञ इति ज्ञात्वा द्रोणः परशुरामस्य समीपं गतवान् शास्त्रज्ञानग्रहणार्थम्। यथोच्यते –

स रामस्य धनुर्वेदं दिव्यान्यस्त्राणि चैव ह।
श्रुत्वा तेषु मनश्चक्रे नीतिशास्त्रे तथैव च।। [8] इति।

तदा परशुरामो द्रोणमपृच्छद् यत्, मम अस्त्रशरीरशस्त्रेषु किं भवतः प्रार्थितम्? तदा द्रोण आह, अस्त्रशास्त्राणि मह्यं ददातु। एतत् श्रुत्वा परशुरामो द्रोणाय समग्रधनुर्वेदमयच्छत्। उक्तं च महाभारते –

अस्त्राणि वा शरीरं वा ब्रह्मन्! शस्त्राणि वा पुनः।
वृणीष्व किं प्रयच्छामि तुभ्यं द्रोण! वदस्व तत्।।[9] इति।

द्रोण उवाच

अस्त्राणि ये समग्राणि ससंहाराणि भार्गव।
सप्रयोगरहस्यानि दातुमर्हस्यशेषतः।।[10] इति।
तथेत्युक्त्वा ततस्तस्मै प्रादादस्त्राणि भार्गवः।
सरहस्यव्रतञ्चैव धनुर्वेदमशेषतः।।[11] इति।

द्रोणाचार्यः शिक्षाग्रहणार्थमग्निवेश्यमुनिं निकषा गत्वा गुरुगृहे ब्रह्मचर्यपालनद्वारा गुरुशुश्रूषायां रत आसीत्। तेन उक्तं स्वमुखेन –

महर्षेरग्निवेश्यस्य सकाशमहमच्युत।
अस्त्रार्थमगमं पूर्वं धनुर्वेदजिघृक्षया।।
ब्रह्मचारी विनीतात्मा जटिलो बहुलाः समाः।
अवसं सुचिरं तत्र गुरुशुश्रूषणे रतः।।
पाञ्चालराजपुत्रश्च यज्ञसेनो महाबलः।
इष्वस्त्रहेतोर्न्यवसत्तस्मिन्नेव गुरौ प्रभुः।।[12] इति।

अत एव द्रोण एक उत्तमः छात्र आसीत्। अतो यदि कोऽपि आदर्श आचार्यो भवितुमर्हति तर्हि प्रथमतः स आदर्शच्छात्रः अपि भवेद् इति मन्ये।
आचार्यो द्रोण एक उत्तमो मनुष्यः अपि आसीत्। यदा महात्मा भीष्मो द्रोणं पाण्डवकौरवाणां गुरुरूपेण गृहीतवान् अपि च अन्नवस्त्राणि पाण्डवकौरवान् च द्रोणाय दातुम् अङ्गीकृतवान् तदा द्रोणो भीष्ममवदत् – अधुना पाण्डवकौरवाणामाचार्यः कृपः, तस्य स्थाने यदि अहं भविष्यामि तर्हि कृपाचार्यः असन्तुष्टो भवेत्। अतः अहं किञ्चिद् धनं नीत्वा आनन्दितचित्तेन आश्रमं गमिष्यामि।

प्रतिजग्राह तं भीष्मो गुरुं पाण्डुसुतैः सह।
पौत्रानादाय तान् सर्वान् वसूनि विविधानि च।।
शिष्या इति ददौ राजन् द्रोणाय विधिपूर्वकम्।
तदा द्रोणोऽब्रवीद्वाक्यं भीष्मं बुद्धिमतां वरम्।।
कृपस्तिष्ठति चाचार्यः शस्त्रज्ञः प्राज्ञसम्मतः।
मयि तिष्ठति चेद्विप्रो वैमनस्यं गमिष्यति।।
युष्मान् किञ्चिच्च याचित्वा धनं सङ्गृह्य हर्षितः।
स्वमाश्रमपदं राजन् गमिष्यामि यथागतम्।।[13] इति।

वीरश्रेष्ठो भीष्मो द्रोणाचार्यम् उपयुक्तशिक्षकरूपेण वर्णितवान्। भीष्मेण उक्तं महाभारतस्यादिपर्वणि –

त्वं गुरुर्भव पौत्राणामाचार्यस्त्वं मतो मम।[14] इति।

शिक्षक आचार्यो वा पाठदानकाले दक्षो भवेत्। स छात्राणां पाठग्रहणस्य सामर्थ्यं दृष्ट्वा छात्रेभ्यो विद्यादानं करिष्यति। कश्छात्रः कस्मिन् विषये पारदर्शी भविष्यतीति शिक्षकस्यैव विचार्यो विषयः। आचार्यो द्रोणस्तस्य सर्वेषु शिष्येषु श्रेष्ठः शिष्यः अर्जुन इति मत्वा सः अर्जुनाय ब्रह्मशिर इति अस्त्रं प्रयच्छति स्म।

अस्त्रं ब्रह्मशिरो नाम यद्दहेत्पृथिवीम्।
ददता गुरुणा चोक्तं न मनुष्येष्विदं त्वया।।
भारद्वाज विमोक्तव्यमल्पवीर्येष्वपि प्रभो।
त्वया प्राप्तमिदं वीर दिव्यं नान्योऽर्हति त्विदम्।।[15] इति।

---

३ महाभारते, शान्तिपर्वणि
४ महाभारते, शान्तिपर्वणि, १०८.२६
५ महाभारते आदिपर्वणि, २६०.१४
६ महाभारते आदिपर्वणि, २६०.१६
७ महाभारते आदिपर्वणि, २६०.३-५
८ महाभारते आदिपर्वणि, २६०.२८
९ महाभारते आदिपर्वणि, २६०.४०
१० महाभारते आदिपर्वणि, २६०.४१
११ महाभारते आदिपर्वणि, २६०.४२
१२ महाभारते आदिपर्वणि, २७०.४० - ४२
१३ महाभारते आदिपर्वणि, २८०.१-४
१४ महाभारते आदिपर्वणि, २८०.६

आचार्यः स्नेहपरायणो भवेत्। आचार्यो द्रोणः शिष्यान् प्रति स्नेहपरायण आसीत्। उक्तं यथा महाभारते –

ततोऽर्जुनं तदा मूर्ध्नि समाघ्राय पुनः पुनः।
प्रीतिपूर्वं परिष्वज्य प्ररुरोद मुदा तदा।।[16] इति।

शिक्षादानकाले शिक्षकः छात्राणां कृते परीक्षाग्रहणमपि करिष्यति। यथा महाभारते द्रोणाचार्यस्तस्य शिष्याणां परीक्षाग्रहणमकरोत्। आचार्यो द्रोणः कृत्रिमं शकुनं निर्माय तं शकुनं बाणविद्धं कर्तुं छात्रानादिदेश। यथोच्यते –

तांस्तु सर्वान् समानीय सर्वविद्यासु शिक्षितान्।
द्रोणः प्रहरणज्ञाने जिज्ञासुः पुरुषर्षभ।।
कृत्रिमं भासमारोप्य वृक्षाग्रे शिल्पिभिः कृतम्।
अविज्ञातं कुमारणां लक्ष्यभूतमुपादिशत्।।

द्रोण उवाच

शीघ्रं भवन्तः सर्वेऽपि धनूंष्यादाय सर्वशः।
भासमेतं समुद्दिश्य तिष्ठोर्ध्वं संहितेषवः।। [17] इति।

द्रोणाचार्यस्तु वाक्यबलेन एकस्य एकस्य छात्रस्य परीक्षाग्रहणमपि अकरोत्। युधिष्ठिरादिशिष्यगणः परीक्षायामसमर्थः अभवत्। केवलः अर्जुनो द्रोणस्य परीक्षायामुत्तीर्णः अभवत्। स द्रोणस्य श्रेष्ठः शिष्य आसीत्। तदुच्यते –

एवमुक्तः सव्यसाची मण्डलीकृतकार्म्मुकः।
तस्थौ भासं समुद्दिश्य गुरुवाक्यप्रचोदितः।।
मुहूर्त्तादिव तं द्रोणस्तथैव समभाषत।
पश्यसीमं स्थितं भासं द्रुमं मामपि चेत्युत।।
पश्याम्येकं भासमिति द्रोणं पार्थोऽभ्यभाषत।
न तु वृक्षं भवन्तं वा पश्यामीति च भारत।।
ततः प्रीतमना द्रोणो मुहूर्त्तादिव तं पुनः।
प्रत्यभाषत दुर्धर्षः पाण्डवानां महारथम्।।
भासं पश्यसि यद्येन तथा ब्रूहि पुनर्वचः।
शिरः पश्यामि भासस्य न गात्रमिति सोऽब्रवीत्।।[18] इति।

अत एव द्रोण एक उत्तमश्छात्रः, शास्त्रज्ञः, पण्डितः, स्नेहपरायणः, अस्त्रशास्त्रनिपुण आसीत्। अमी गुणा आचार्यस्य भवेयुरिति मन्ये। आचार्यो द्रोणो महाभारतस्य काले उल्लेखयोग्य आचार्य आसीत्। आधुनिककाले अपि आचार्यस्य द्रोणस्य नामानुसारेण पुरस्कारं प्रयच्छति भारतसर्वकारः। द्रोणो यथा अर्जुनादिच्छात्राणां निर्माणकर्ता आसीत् तथा वर्तमानकाले अपि द्रोणाचार्य इव कोऽपि शिक्षक आचार्यो गुर्वा श्रेष्ठच्छात्राणां श्रेष्ठशिष्याणां वा निर्माणकर्ता भवति चेत् तस्मै शिक्षकाय द्रोणाचार्य इति पुरस्कारं प्रयच्छति अस्माकं भारतस्य सर्वकारः। एतेन वक्तुं शक्यते यद् द्रोणाचार्यस्य महिमा अधुनापि श्रेष्ठशिक्षकरूपेण कीर्तितः।
द्रोणाचार्यो निषादपुत्राय एकलव्याय धनुर्वेदशिक्षां न अयच्छत्। उक्तं च महाभारते –

न स तं प्रतिजग्राह नैषादिरिति चिन्तयन्।
शिष्यं धनुषि धर्मज्ञस्तेषामेवान्ववेक्षया।। [19] इति।

तथापि एकलव्यो द्रोणस्य चरणयोः प्रणामं कृत्वा वनं गत्वा मृन्मयद्रोणमूर्तिनिर्माणं कृत्वा विशेषनियमेन धनुर्वेदशिक्षाग्रहणम् अकरोत्। एवम्प्रकारेण एकलव्यो यदा धनुर्वेदशिक्षायां पाण्डवेभ्यः अपि अधिको बलवान् धुनर्धरः अभवत् तदा आचार्यो द्रोणः पूर्वम् अर्जुनप्रदत्तवचनस्य रक्षणाय एकलव्यं गुरुदक्षिणारूपेण तस्य दक्षिणाङ्गुष्ठं याचितवान्। एकलव्यो झटिति तस्य दक्षिणाङ्गुष्ठस्य छेदनं कृत्वा द्रोणाचार्यस्य हस्ते समर्पितवान्। यथोक्तं महाभारते –

ततो द्रोणोऽब्रवीद्राजन्नेकलव्यमिदं वचः।
यदि शिष्योऽसि मे वीर वेतनं दीयतां मम।।
एकलव्यस्तु तच्छ्रुत्वा प्रीयमाणोऽब्रवीदिदम्।
किं प्रयच्छामि भगवन्नाज्ञापयतु मां गुरुः।।
न हि किञ्चिददेयं मे गुरवे ब्रह्मवित्तम।
तमब्रवीत्त्वयाङ्गुष्ठो दक्षिणो दीयतामिति।।
एकलव्यस्तु तच्छ्रुत्वा वचो द्रोणस्य दारुणम्।
प्रतिज्ञामात्मनो रक्षन् सत्ये च नियतः सदा।।
तथैव हृष्टवदनस्तथैवादीनमानसः।
छित्त्वाऽविचार्य तं प्रादाद्द्रोणायाङ्गुष्ठमात्मनः।। [20] इति।

एतेन वक्तुं शक्यते एकलव्यस्तु एक उत्तमः शिष्य आसीत्। स्मृतिशास्त्रे निषादपुत्रेभ्यो विद्यादानं निषिद्धमासीत्। किन्तु द्रोणाचार्यस्य दक्षिणाङ्गुष्ठरूपगुरुदक्षिणाग्रहणकार्यं किं वर्तमानकाले समीचीनम्? अयं विषयः पण्डितानां विचार्यः।

**कृपाचार्यः**

महाभारते वर्णितः अपर एक आचार्यः कृप आसीत्। आ बाल्यात् कृपः तस्य पितुः शरद्वतः धनुर्वेदशिक्षां लब्धवान्। कालापगते स एकः प्रधानाचार्यः अभवत्। धृतराष्ट्रपुत्राः पाण्डोः पुत्रा विविधदेशादागता राजपुत्राः कृपाचार्याद् धनुर्वेदशिक्षां लब्धवन्तः। अत एव कृपाचार्यः पण्डितो ज्ञानी, धनुर्वेदज्ञ आसीत्। महाभारते यथा भणितम् –

कृपोऽपि च तदा राजन् धनुर्वेदपरोऽभवत्।
चतुर्विधं धनुर्वेदं शास्त्राणि विविधानि च।।
निखिलेनास्य तत् सर्वं गुह्यमाख्यातवान् पिता।
सोऽचिरेणैव कालेन परमाचार्यतां गतः।।
ततोऽधिजग्मुः सर्वे ते धनुर्वेदं महारथाः।
धृतराष्ट्रात्मजाश्चैव पाण्डवाश्च महाबलाः।।
वृष्णयश्च नृपाश्चान्ये नानादेशसमागताः।
कृपमाचार्यमासाद्य परमास्त्रज्ञतां गताः।।[21] इति।

**परशुरामः**

आचार्यः परशुरामो महाभारते वर्णित एको दानशील आचार्य आसीत्। स आसीत् क्षमाशील इन्द्रियसंयमी शत्रुहन्ता। आचार्यः परशुरामो धनुर्वेदे पण्डित आसीत्। स नीतिशास्त्रे अपि निपुण आसीत्। परशुरामो ब्राह्मणादिगणाय तस्य सर्वाणि धनानि अयच्छत्। स आचार्याय द्रोणाय समग्रं धनुर्वेदशास्त्रम् अयच्छत्। उक्तं च महाभारते –

हिरण्यं मम यच्चान्यद्वसु किञ्चिदिह स्थितम्।
ब्राह्मणेभ्यो मया दत्तं सर्वमेव तपोधन।।
तथैवेयं धरा देवी सागरान्ता सपत्तना।
कश्यपाय मया दत्ता कृत्स्ना नगरमालिनी।।
तथेत्युक्त्वा ततस्तस्मै प्रादादस्त्राणि भार्गवः।
सरहस्यव्रतञ्चैव धनुर्वेदमशेषतः।।[22] इति।

---

१५ महाभारते आदिपर्वणि, १३४.११-१२
१६ महाभारते आदिपर्वणि, ११८.१४
१७ महाभारते आदिपर्वणि, १२८. ७६-७८
१८ महाभारते आदिपर्वणि, १२८. ३०-३५
१९ महाभारते आदिपर्वणि, २८०.४१
२० महाभारते आदिपर्वणि, २८०. ६३-६७
२१ महाभारते आदिपर्वणि, २५०. २२-२५

**व्यासदेवः**

व्यासदेवः सत्यवतीपराशरयोः पुत्र आसीत्। स यमुनाद्वीपे पालितोऽभूत्। तत्र स क्रमेण शक्तिमान् अभवत्। ततः स मातुः अनुमतेः ग्रहणात् परं तपस्यारम्भं कृतवान्। द्वीपवास्तव्यत्वादेव तस्य द्वैपायन इत्यभिधा। स तु महाज्ञानी आसीत्। प्रतियुगं धर्मस्य ह्रासो भवति। अपि च मनुष्याणाम् आयुषः शक्तेः च ह्रासो भवति। युगस्य एतत् चित्रं दृष्ट्वा स वेदस्य भागचतुष्टयं कृतवान्। एतेन व्यास इति नाम्ना अभिधीयते। यथोक्तं महाभारते –

जज्ञे च यमुनाद्वीपे पारशर्यः स वीर्यवान्।
स मातरमनुज्ञाप्य तपस्येव मनो दधे॥
स्मृतोऽहं दर्शयिष्यामि कृत्येष्विति च सोऽब्रवीत्।
एवं द्वैपायनो जज्ञे सत्यवत्यां पराशरात्॥
न्यस्तो द्वीपे स यद्बालस्तस्माद्वैपायनः स्मृतः।
पादापसारिणं धर्मं स तु विद्वान् युगे युगे॥
आयुः शक्तिञ्च मर्त्यानां युगावस्थानमवेक्ष्य च।
ब्राह्मणो ब्राह्मणानाञ्च तथानुग्रहकाङ्क्षया।
विव्यास वेदान् यस्मात् स तस्माद् व्यास इति स्मृतः॥[23] इति।

वेदव्यासस्तु सर्वज्ञ आसीत्। ग्राम-नगर-प्राणि-वासस्थान-गुप्तविषय-चतुर्वेद-योग-शिल्प-धर्मार्थकामशास्त्राणां विषये व्यासः सुपण्डित आसीत्। समाजस्य शृङ्खला-प्रभृति-विषये तस्य प्रभूतज्ञानमासीत्। वस्तुतः स सर्वशास्त्रे निपुण आसीत्। यथोक्तम् –

भूतस्थानानि सर्वाणि रहस्यं त्रिविधञ्च यत्।
वेदा योगः सविज्ञानो धर्मोऽर्थः काम एव च॥
धर्मार्थकामयुक्तानि शास्त्राणि विविधानि च।
लोकयात्राविधानञ्च सर्वं तद्दृष्टवानृषिः॥[24] इति।

वेदव्यास एक आचार्य आसीत्। अयं प्रभावशाली वरदाता मुनिश्रेष्ठो द्वैपायनः पैलाय, जैमिनये, वैशम्पायनाय, सुमन्तवे च ऋक्सामयजुरथर्वणां विद्यां प्रयच्छति स्म। यथा भणितम् –

वेदानध्यापयामास महाभारतपञ्चमान्।
सुमन्तं जैमिनिं पैलं शुकञ्चैव स्वमात्मजम्॥
प्रभुर्वरिष्ठो वरदो वैशम्पायनमेव च।
संहितास्तैः पृथक्त्वेन भारतस्य प्रकाशिताः॥[25] इति।

यथोक्तं श्रीमद्भागवतमहापुराणे

तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः।
वैशम्पायन एवैको निष्णातो यजुषामुतः॥
अथर्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः।
इतिहासपुराणानां पिता मे रोमहर्षणः॥[26] इति।

आचार्यस्तु शिष्याणां पथप्रदर्शक एव। महाभारतस्यादिपर्वणि महात्मा व्यासदेवः पाण्डवानां पथप्रदर्शकरूपेण तान् पाण्डवान् परिचालयति स्म। यदा वनपथे पाण्डवाः कुन्त्या सह गमनकाले व्यासदेवं दृष्ट्वा नमस्कृत्य गतवन्तः तदा व्यासदेवः पाण्डवेभ्यः सुपरामर्शं दत्तवान्। पाण्डवाः कुत्र केन प्रकारेण गमिष्यन्ति इत्यपि व्यासदेवेन उक्तम्। व्यासदेवस्तु वेदज्ञः, नीतिशास्त्रज्ञ आसीत्। यथा उक्तं महाभारते –

ब्राह्मं वेदमधीयाना वेदाङ्गानि च सर्वशः।
नीतिशास्त्रञ्च धर्मज्ञा ददृशुस्ते पितामहम्॥
यक्ष्यन्ति च नरव्याघ्रा निर्जित्य पृथिवीमिमाम्।
राजसूयामश्वमेधाद्यैः क्रतुभिर्भूरिदक्षिणैः॥
इह मां सम्प्रतीक्षमागमिष्याम्यहं पुनः।
देशकालौ विदित्वैव लप्स्यध्वं परमां मुदम्॥
स तैः प्राञ्जलिभिः सर्वैस्तथेत्युक्त्वा नराधिप।
जगाम भगवान् व्यासो यथागतमृषिः प्रभुः॥[27] इति।

**रामायणदृष्ट्या**

रामायणं न केवलं काव्यम्, रामायणं तु महाकाव्यम्, वीरकाव्यम्, धर्मशास्त्रम्, आदिकाव्यं वा। अस्मिन् रामायणमहाकाव्ये भाषाया मधुरता, ओजःप्रसादगुणविशिष्टता, रचनाशैली कुशला, मनोहारिभावनानां भव्यता, रसानामास्वाद्यता, भारतीयसंस्कृतेः उपयोगिता, सभ्यतायाः सुस्पष्टचित्रता, आचारसंहितायाः सार्थकता, नीतिशास्त्रशिक्षायाः सङ्ग्राहकता, अलङ्काराणामाकर्षकता, विभिन्नशास्त्राणामुपादेयता, छन्दसां प्रभाव इत्यादयो विद्यन्ते। रामायणे भारतीयसंस्कृतेः समुज्ज्वलं सुन्दरं स्वाभाविकं च चित्रणं प्राप्यते। स्कन्दपुराणे सत्यमुक्तम् –

रामायणं महाकाव्यं सर्ववेदेषु सम्मतम्।
सर्वपापप्रशमनं दुष्टग्रहनिवारणम्॥
धर्मार्थकाममोक्षाणां हेतुभूतं महाफलम्।
अपूर्वं पुण्यफलदं शृणुध्वं सुसमाहिताः॥ इति।

भारतीयसमाजस्य भारतीयपरिवारस्य च विभिन्नानां सदस्यानां पारस्परिकः कीदृशो व्यवहार आदर्शरूपो भवति इति रामायणे स्पष्टरूपेण वर्णितम्। रामायणे प्राचीन-प्रख्याताचार्याणाम् अगस्त्य-वसिष्ठ-वाल्मीकि-भरद्वाजादीनां माहात्म्यं तु विदितचरमेव।

**अगस्त्यः**

अगस्त्य एकः पण्डितो ज्ञानवान् च ऋषिरासीत्। तस्य बहवः शिष्या आसन्। श्रीरामचन्द्रः अगस्त्यस्य समीपे अध्यात्मज्ञानं लब्धवान्। अगस्त्यात् ज्ञानं लब्ध्वा रामचन्द्रस्य जीवनदर्शनस्य परिवर्तनमभवत्। अगस्त्यो रामाय स्नेहं प्रयच्छति स्म। स ऋषिः रामचन्द्रस्य अनुरागी आसीत्। अपि च रामेण अगस्त्यो देवतया मान्यते स्म। राम आचार्यमहर्षीणां दर्शनेनात्मानं बहु मन्यते स्म। आचार्यस्य जीवनविधिर्ब्रह्मचर्यनिष्ठविद्यार्थिनामादर्श आसीत्। अगस्त्यमधिकृत्य रामायणे निगदितम् –

अगस्त्य इति विख्यातो लोके स्वेनैककर्मणा।
दक्षिणा दिक्कृता येन शरण्या पुण्यकर्मणा॥
ततः शिष्यैः परिवृतो मुनिरप्यभिनष्पतम्।
औदार्येणावगच्छामि निधानं तपसामिमम्॥[28] इति।

**वाल्मीकिः**

वाल्मीकिरेव संस्कृतभाषाया आदिकविः। महर्षिवाल्मीकिकृतं रामायणं लौकिकसंस्कृतस्य आदिकाव्यं खलु। आदिकविर्यदा कामातुरक्रौञ्चपक्षिमिथुनयोः एकस्य वधमपश्यत्, हृदयविदारिकां तद्घटनां दृष्ट्वा वाल्मीकिः स्वीयामनुभूतिं श्लोकरूपेण व्यक्तीकृतवान्। यथा –

२२ महाभारते आदिपर्वणि, २६०. ३७, ३८, ४२
२३ महाभारते आदिपर्वणि, ५८. १२४ - १२७
२४ महाभारते आदिपर्वणि, १. ४७ - ४९
२५ महाभारते आदिपर्वणि, ५८. १२८ - १२९
२६ भागवते प्रथमस्कन्धे, २१ - २२
२७ महाभारते आदिपर्वणि, ५००. ५, १७, २०, २१
२८ रामायणे

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।[29] इति।

अस्यार्थः शोकः श्लोकत्वमागत इत्येषानुभूतिरेव रसानुभूतिरिति कविना परिभाषायामुच्यते। तस्य मुखाद् इदं वचनं श्लोकरूपेणैव निःसृतम्। तं श्रुत्वा स मुनिपुङ्गवः अचिन्तयत् –

पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः।
शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा।।[30] इति।

तदनन्तरं तस्य समीपे जगत्स्रष्टा समुपस्थितः अभूत्। वाल्मीकिं चोवाच – भो महर्षे, त्वं रामस्य चरितं लिख। ततः स महर्षिः रामस्य जीवनमाश्रित्य रामायणाख्यस्य महाकाव्यस्य रचनायां तत्परोऽभूत्। वस्तुतो वाल्मीकिर्वेदज्ञः, शास्त्रज्ञः पुरुष आसीत्। तस्य समाजस्य विषये लोकाचारविषये प्रभूतज्ञानं लक्ष्यते। वाल्मीकेः बहवः शिष्या आसन्। तस्मात् ते शिष्या विद्यां लब्धवन्तः। रामायणे बहुत्रैव एतस्य उल्लेखः परिलक्ष्यते –

स तु तीरं समासाद्य तमसाया मुनिस्तदा।
शिष्यमाह स्थितं पार्श्वे दृष्ट्वा तीर्थमकर्दमम्।।
अकर्दममिदं तीर्थं भरद्वाज निशामय।
रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा।।[31] इति।

वाल्मीकिः कुशलवाभ्यामपि शिक्षां प्रयच्छति। सीता वाल्मीकिमुनेः आश्रमे लवकुशौ इति पुत्रद्वयस्य जन्मदानं कृतवती। ततो वाल्मीकिः ऋषिः परमस्नेहेन तयोः बालकयोः शिक्षादानमकरोत्। यथोक्तं रामायणे –

काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्।
पौलस्त्यवधमित्येवं चकार चरितव्रतः।।
पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम्।
जातिभिः सप्तभिर्युक्तं तन्त्रीलयसमन्वितम्।
रसैः शृङ्गारकरुणहास्यरौद्रभयानकैः।
वीरादिभी रसैर्युक्तं काव्यमेतद्गीयताम्।।[32] इति।

### मालविकाग्निमित्रदृष्ट्या

कालिदासकृते मालविकाग्निमित्रे गुणविचारेण आचार्यभेदो निपुणं निरुपितः। तथाहि भवन्ति केचन आचार्या ये केवलविद्याविभूषिताः, विद्यार्थिषु वेद्यतत्त्वसङ्क्रामणे अनिपुणाः। सन्ति च केचन ये स्वल्पज्ञा अपि शिष्यबोधे सौकर्यकारिणः। परं ये तु विदग्धा विद्यार्थिबोधसुगमतासम्पादकास्त एव शिक्षकमूर्धन्यत्वेन गण्याः। तदुक्तं –

श्लिष्टा क्रिया कस्यचिदात्मसंस्था
संक्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिक्षकाणां
धुरि प्रतिष्ठापयितव्य एव।।[33] इति।

### Conclusion

साहित्ये आदर्शशिक्षकचरितस्य वैशिष्ट्यानि परिलक्ष्यन्ते। महाभारते द्रोणाचार्यस्य परशुरामस्य व्यासदेवस्य च चरितं वर्णितम्। रामायणे अगस्त्य-वाल्मीकि-प्रभृतेः चरितम् आलोचितम्। एतादृशं चरितं तु आदर्शशिक्षकस्य चरितम्। एतेषु चरितेषु आदर्शशिक्षकस्य बहूनि वैशिष्ट्यानि परिलक्ष्यन्ते। आदर्शशिक्षकस्तु स्नेहपरायणः, शास्त्रज्ञः, पण्डितः, बुद्धिमान्, उदारचेता भवेत्। वस्तुत आदर्शशिक्षकचरितस्य भाग-द्वयं परिलक्ष्यते। एकं तु शिक्षकस्य पठनपाठनस्य वैशिष्ट्यम्, अपरं च शिक्षकस्य सदाचारस्य वैशिष्ट्यम्। शिक्षकस्तु ज्ञानवान्, पण्डितो दार्शिनकश्च भवेद् एतत् सत्यम्, किन्तु शिक्षकः सदाचारी अपि भवेत्। सदाचारं विना शिक्षकस्य जीवनम् अनर्थकम्। सदाचाराद् एव जीवो दीर्घमायुः अक्षयं धनं च लभते। सदाचारेण खलु मनुष्य उन्नतेश्चरमशिखरं गच्छति। अत एव ऋषिभिः समस्तवर्णेभ्यः सदाचारः अनिवार्यः प्रतिपादितः। 'चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः'। चरित्रमेव पुरुषस्य सर्वस्वम्। चरितरक्षणेनैव मानवत्वं देवत्वञ्च। चरित्रं हि जीवनस्य सर्वस्वम्। आधुनिककाले यः कमपि विषयमुत्तमरूपेण पाठयति स एव शिक्षक इति कथ्यते। किन्तु आदर्शशिक्षकः स तु न। आदर्शशिक्षकः स एव यः छात्रान् उत्तमरूपेण पाठयति, अपि च यः छात्राणामादर्शजीवननिर्माणाय उपदेशप्रदानं करोति। यस्य शिक्षकस्य आदर्शचरितं दृष्ट्वा छात्रः अपि आदर्शवान् भवेत्, स एव आदर्शशिक्षकः।

### ग्रन्थपञ्जी (Bibliography)


1. भारतेर ऋषि जीवन ओ साधना, पृथ्वीराजसेनसम्पादितः, २०१६-खृष्टाब्दे कलिकातायां गिरिजाप्रकाशितः।
2. मालविकाग्निमित्रम्, मञ्जुभाषिणीटीकयोपेतम्, कालिदासेन विरचितम्, श्रीयुक्त-रेवतीकान्त-भट्टाचार्येण सम्पादितम्, १३२०-वङ्गाब्दीयजन्माष्टम्यां कलिकातायां श्रीमदखिलबन्धुभट्टाचार्येण प्रकाशितम्।
3. महाभारतम् (आदिपर्वणः तृतीयखण्डं भारतकौमुदीसमाख्यया टीकया सहितम्), श्रीकृष्णद्वैपायनवेदव्यासप्रणीतम्, द्वितीयसंस्करणात्मकम्, १३८३-वङ्गाब्दस्य माघमासे कलिकातायां विश्ववाणीप्रकाशनी-प्रकाशितम्।
4. रामायणम् (प्रथमखण्डम्), वाल्मीकिविरचितम्, प्रथमसंस्करणात्मकम्, श्रीसनत्कुमारवन्द्योपाध्यायेन सम्पादितम्, २०१५-खृष्टाब्दस्य एकत्रिंशे दिवसे, गोरखपुरे, गीताप्रेस-प्रकाशितम्।
5. रामायणम् (बालकाण्डम्), वाल्मीकिविरचितम्, द्वितीयसंस्करणात्मकम्, श्रीमदशोककुमारवन्द्योपाध्यायसम्पादितम्, १४१२-वङ्गाब्दे कलिकातायां श्रीबलरामप्रकाशनी-प्रकाशितम्।
6. रामायण ओ महाभारतेर कतिपय आदर्श चरित्र, गायत्रीगङ्गोपाध्यायेन सम्पादितः, २०१५-खृष्टाब्दे गोरखपुरे गीताप्रेस-प्रकाशितः।
7. वाचस्पत्यम्, श्रीराजानाथतर्कवाचस्पतिभट्टाचार्येण सङ्कलितम्, २००३-खृष्टाब्दे वाराणस्यां चौखम्बा-संस्कृत-सीरीज-अफिस-प्रकाशितम्।
8. शिशुभारती महाभारत, ड.अमियधरेण सम्पादितः, साहित्यभारती पाब्लिकेशन्स्-प्राइभेट्-लिमिटेड्-प्रकाशितः।
9. शिशुभारती रामायण, ड.अमियधरेण सम्पादितः, साहित्यभारती पाब्लिकेशन्स्-प्रा३६.संस्कृतनिबन्धमकरन्दः (प्रथमभागो द्वितीयभागश्च), तृतीयसंस्करणात्मकः, ड.कृष्णदत्तमिश्रसम्पादितः, २०१३-खृष्टाब्दे वाराणस्यां चौखम्बा-संस्कृत-सिरिज-प्रकाशितः।
10. शब्दकल्पद्रुमः, राजाराधाकान्तदेव-बाहादुरेण विरचितः, २००१-खृष्टाब्दे वाराणस्यां चौखम्बा-संस्कृत-सीरीज-अफिस-प्रकाशितः।
11. सुभाषितरत्नभाण्डागारम्, नारायण-राम-आचार्येण सम्पादितम्, २००३-खृष्टाब्दे वाराणस्यां चौखम्बा-संस्कृत-सीरीज-अफिस-प्रकाशितम्।
12. A New Trilingual Dictionary, Govindagopala Mukhopadhyaya, Sanskrit Book Depot.
13. The student's Sanskrit-English Dictionary, Vaman Shivram Apte, 2010, New Delhi, Rashtriya Sanskrit Sansthan.


२९ रामायणस्य बालकाण्डे २.१५
३० रामायणस्य बालकाण्डे २.१८
३१ रामायणस्य बालकाण्डे २.४-५
३२ रामायणस्य बालकाण्डे, ४. ७-९
३३ मालविकाग्निमित्रे १.१६